# Shiva Sahasranama Stotram from Shivarahasya

# શ્રીશિવરહસ્યાન્તર્ગતં શિવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shivasahasranamastotram from Shivarahasya 5.40

File name : shivasahasranAmastotramshivarahasya.itx

Category : sahasranAma, shiva, stotra, shivarahasya

Location : doc_shiva

Author : Traditional

Transliterated by : DPD

Proofread by : DPD, Ruma Dewan

Description-comments : || shrIshivarahasyam | bhargAkhye panchamAMshaH | adhyAyaH 40| 1-152 ||

Latest update : July 1, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 1, 2023

*sanskritdocuments.org*

# શ્રીશિવરહસ્યાન્તર્ગતં શિવસહસ્રનામસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ભર્ગાખ્યે પઞ્ચમાંશે
શિવગૌરીસંવાદે ચત્વારિંશોઽધ્યાયઃ ॥)

દેવી -
શ્રુતં સુદર્શનાખ્યાનં ત્વત્તો વિસ્માપનં મમ ।
પ્રદોષે પાપિના તેન દૃષ્ટશ્ચાન્યાર્ચિતઃ શિવઃ ॥ ૧॥

શેષેણ નામસાહસ્રૈસ્ત્વં સ્તુતઃ કથમીશ્વર ।
ત્વન્નામ્નાં શ્રવણેચ્છા મે ભૂયસી ભવતિ પ્રભો ॥ ૨॥

- -

સૂતઃ -
તસ્મિન્કૈલાસશિખરે સુખાસીનં મહેશ્વરમ્ ।
પ્રણમ્ય પ્રાર્થયામાસ સા દેવી જગદમ્બિકા ॥ ૩॥

તદા દેવ્યા મહાદેવઃ પ્રાર્થિતઃ સર્વકામદઃ ।
ભવો ભવાનીમાહેત્થં સર્વપાપપ્રણાશકમ્ ॥ ૪॥

ફણીશો મુખસાહસ્રૈર્યાનિ નામાનિ ચોક્તવાન્ ।
તાનિ વઃ સમ્પ્રવક્ષ્યામિ યથા મમ ગુરોઃ શ્રુતમ્ ॥ ૫॥

- -

ઈશ્વરઃ -
ઋષિઃ છન્દો દૈવતં ચ તાન્યહં ક્રમશોઽમ્બિકે ।
સહસ્રનામ્નાં પુણ્યં મે ફણીન્દ્રઃ કૃતવાનુમે ॥ ૬॥

ઋષિસ્તસ્ય હિ શેષોઽયં છન્દોઽનુષ્ટુપ્ પ્રકીર્તિતમ્ ।
દેવતાસ્યાહમીશાનિ સર્વત્ર વિનિયોજનમ્ ॥ ૭॥

ધ્યાનં તે કથયામ્યદ્ય શ્રૃણુ ત્વમગકન્યકે ।

- -

કૈલાસે સુહિરણ્યવિષ્ટરવરે દેવ્યા સમાલિઙ્ગિતં
નન્દ્યાદ્યૈર્ગણૈઃ સદા પરિવૃતં વન્દે શિવં સુન્દરમ્ ।
ભક્તાઘૌઘનિકૃન્તનૈકપરશું બિભ્રાણમિન્દુપ્રભં
સ્કન્દાદ્યૈર્ગજવક્ત્ર(?) સેવિતપદં ધ્યાયામિ સામ્બં સદા ॥ ૮॥

- -

એવં મામમ્બિકે ધ્યાત્વા નામાનિ પ્રજપેત્તતઃ ।
હૃત્પદ્મસદ્મસંસ્થં માં સર્વાભીષ્ટાર્થસિદ્ધયે ॥ ૯॥

પુણ્યકાલેષુ સર્વેષુ સોમવારે વિશેષતઃ ।
બિલ્વપત્રૈઃ પઙ્કજૈશ્ચ પુણ્યનામાનિ શઙ્કરિ ॥ ૧૦॥

પૂજયેન્નામસાહસ્રૈઃ સર્વાર્થપ્રાપ્તયે શિવે ।
યો યં કામયતે કામં તં તમાપ્નોતિ શઙ્કરિ ॥ ૧૧॥

ધનાર્થી લભતે વિત્તં કન્યાર્થી કન્યકાં તથા ।
રાજ્યાર્થી રાજ્યમાપ્નોતિ મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૧૨॥

શ‍ૃણુ દેવિ પરં પુણ્યં માતૃકાનામનુત્તમમ્ ।
સહસ્રં પ્રજપેન્નિત્યં ધર્મકામાર્થમોક્ષભાક્ ॥ ૧૩॥

- -

ઈશ્વરઃ -
(અથ સહસ્રનામસ્તોત્રમ્ ।)
ૐ ૐકારનિલયાત્મસ્થઃ ૐકારાર્થૈકવાચકઃ ।
ૐકારેશાકૃતિરોમિતિશબ્દકૃતસ્તુતિઃ ॥ ૧૪॥

ૐકારકુણ્ડનિલયલિઙ્ગપૂજનપાપહૃત્ ।
નમિતાશેષદેવાદિર્નદીપુલિતસંસ્થિતઃ ॥ ૧૫॥

નન્દિવાદ્યપ્રિયો નિત્યો નામપારાયણપ્રિયઃ ।
મહેન્દ્રનિલયો માની માનસાન્તરપાપભિત્ ॥ ૧૬॥

મયસ્કરો મહાયોગી માયાચક્રપ્રવર્તકઃ ।
શિવઃ શિવતરઃ શીતઃ શીતાંશુકૃતભૂષણઃ ॥ ૧૭॥

ધનુઃશરકરો ધ્યાતા ધર્માધર્મપરાયણઃ ।
આત્મા આતાર્ય આલાદ્ય અનઙ્ગશરખણ્ડનઃ ॥ ૧૮॥

ઈશાન ઈડ્ય ઈધ્રયશ્ચ ઇભમસ્તકસંસ્તુતઃ ।
ઉમાસંશ્લિષ્ટવામાઙ્ગ ઉશીનરનૃપાર્ચિતઃ ॥ ૧૯॥

ઉદુમ્બરફલપ્રીત ઉમાદિસુરપૂજિતઃ ।
ઋજીષીકૃતભૂચક્રો રિપુપ્રમથનોર્જિતઃ ॥ ૨૦॥

લિઙ્ગાર્ચકજનપ્રીતો લિઙ્ગી લિઙ્ગસમપ્રિયઃ ।
લિપિપ્રિયો બિન્દુહીનો લીલાકૃતજગત્રયઃ ॥ ૨૧॥

ઐન્દ્રીદિક્પતિસંયુક્ત ઐશ્વર્યાદિફલપ્રદઃ ।
ઔત્તાનપાદપૂજ્યાઙ્ઘ્રિરૌમાદિસુરપૂજિતઃ ॥ ૨૨॥

કલ્યાણાચલકોદણ્ડઃ કામિતાર્થફલપ્રદઃ ।
કસ્તૂરીતિલકપ્રીતઃ કર્પૂરાભકલેવરઃ ॥ ૨૩॥

કરન્ધમસુતપ્રીતઃ કલ્પાદિપરિવર્જિતઃ ।
કલ્પિતાનેકભૂતાદિઃ કલિકલ્મષનાશનઃ ॥ ૨૪॥

કમલાભલસન્નેત્રઃ કમલાપતિપૂજિતઃ ।
ખગોલ્કાદિત્યવરદઃ ખઞ્જરીટવરપ્રદઃ ॥ ૨૫॥

ખર્જૂરવનમધ્યસ્થઃ ખણ્ડિતાખણ્ડલીકરઃ ।
ખગઃ ખડ્ગહરઃ ખણ્ડઃ ખગગઃ ખાકૃતિઃ ખસઃ ॥ ૨૬॥

ખણ્ડપર્શુઃ ખણ્ડઘનઃ ખણ્ડિતારાતિમણ્ડલઃ ।
ગન્ધર્વગણસુપ્રીતો ગન્ધધૃગ્ગર્વનાશકઃ ॥ ૨૭॥

ગઙ્ગાધરો ગોગણેશો ગણેશવરપુત્રકઃ ।
ગતિદો ગદહા ગન્ધી ગન્ધમાલ્યવરાર્ચિતઃ ॥ ૨૮॥

ગગનસ્થો ગણપતિર્ગગનાભોગભૂષણઃ ।
ઘણ્ટાકર્ણપ્રિયો ઘણ્ટી ઘટજસ્તુતિસુપ્રિયઃ ॥ ૨૯॥

ઘોટકપ્રિયપુત્રશ્ચ ઘર્મકાલો ઘનાકૃતિઃ ।
ઘનવાહો ઘૃતાધ્યક્ષો ઘનઘોષો ઘટેશ્વરઃ ॥ ૩૦॥

ઘટાનાદકરપ્રીતો ઘટીભૂતમહાગિરિઃ ।
ચન્દ્રચૂડશ્ચન્દ્રકરશ્ચન્દનાર્દ્રશ્ચતુષ્પથઃ ॥ ૩૧॥

ચમસોદ્ભેદમધ્યસ્થશ્ચણ્ડકોપશ્ચતુર્મુખઃ ।
ચક્ષુઃશ્રોતમહાહારશ્ચણ્ડિકેશવરપ્રદઃ ॥ ૩૨॥

ચેતોજન્મહરશ્ચણ્ડશ્ચાતુર્હોત્રપ્રિયશ્ચરઃ ।
ચતુર્મુખમુખસ્તુત્યશ્ચતુર્વેદશ્ચરાચરઃ ॥ ૩૩ ॥

ચણ્ડભાનુકરાન્તઃસ્થશ્ચતુર્મૂર્તિવપુઃસ્થિતઃ ।
છાદિતાનેકલોકાદિઃ છન્દસાં ગણમધ્યગઃ ॥ ૩૪ ॥

છત્રચામરશોભાઢ્યઃ છન્દોગગતિદાયકઃ ।
જઙ્ગમાજઙ્ગમાકારો જગન્નાથો જગદ્ગતઃ ॥ ૩૫ ॥

જહ્નુકન્યાજટો જપ્યો જેતા જત્રુર્જનાર્તિહા ।
જમ્ભારાતિર્જનપ્રીતો જનકો જનિકોવિદઃ ॥ ૩૬ ॥

જનાર્દનાર્દનો જામિજાત્યાદિપરિવર્જિતઃ ।
ઝણજ્ઝણાઙ્ઘ્રિજારાવો ઝઙ્કારોજ્ઝિતદુષ્ક્રિયઃ ॥ ૩૭ ॥

ટઙ્કુપ્રિયષ્ટઙ્કૃતિકષ્ટઙ્કુભેદી ટકારકઃ ।
ટાદિવર્ણપ્રિયષ્ઠાન્તો ઢક્કાનાદપ્રિયોરસઃ ॥ ૩૮ ॥

ડામરીતન્ત્રમધ્યસ્થો ડમરુધ્વનિશોભિતઃ ।
ઢક્કાધ્વનિકૃતાનલ્પબધિરીકૃતદિઙ્મુખ ॥ ૩૯ ॥

ણકારો ણણુકોત્થાદિર્ણાન્તકૃણ્ણતિમોચકઃ ।
તસ્કરસ્તામ્રકસ્તાર્ક્ષ્યસ્તામસાદિગુણોજ્ઝિતઃ ॥ ૪૦ ॥

તરુમૂલપ્રિયસ્તાતસ્તમસાન્નાશકસ્તટઃ ।
થાનાસુરહરઃ સ્થાતા સ્થાણુઃ સ્થાનપ્રિયઃ સ્થિરઃ ॥ ૪૧ ॥

દાતા દાનપતિર્દાન્તો દન્દશૂકવિભૂષિતઃ ।
દર્શનીયો દીનદયો દણ્ડિતારાતિમણ્ડલઃ ॥ ૪૨ ॥

દક્ષયજ્ઞહરો દેવો દાનવારિર્દમોદયઃ ।
દત્તાત્રેયપ્રિયો દણ્ડી દાડિમીકુસુમપ્રિયઃ ॥ ૪૩ ॥

ધાતા ધનાધિપસખો ધનધાન્યપ્રદો ધનમ્ ।
ધામપ્રિયોઽન્ધસાં નાથો ધર્મવાહો ધનુર્ધરઃ ॥ ૪૪ ॥

નમસ્કારપ્રિયો નાથો નમિતાશેષદુઃખહૃત્ ।
નન્દિપ્રિયો નર્મસખો નર્મદાતીરસંસ્થિતઃ ॥ ૪૫ ॥

નન્દનો નમસામીશો નાનારૂપો નદીગતઃ ।

નામપ્રીતો નામરૂપગુણકર્મવિવર્જિતઃ ॥ ૪૬॥

પત્તીનાં ચ પતિઃ પાર્થઃ પરમાત્મા પરાત્પરઃ ।
પઙ્કજાસનપૂજ્યાઙ્ઘ્રિઃ પદ્મનાભવરપ્રદઃ ॥ ૪૭॥

પન્નગાધિપસદ્ધારઃ પશૂનામ્પતિર્પાવકઃ ।
પાપહા પણ્ડિતઃ પાન્થો પાદપોન્મથનઃ પરઃ ॥ ૪૮॥

ફણીફણાલસન્મૌલિઃ ફણિકઙ્કણસત્કરઃ ।
ફણિતાનેકવેદોક્તિઃ ફણિમાણિક્યભૂષિતઃ ॥ ૪૯॥

બન્ધમોચનકૃદ્બન્ધુર્બન્ધુરાલકશોભિતઃ ।
બલી બલવતામ્મુખ્યો બલિપુત્રવરપ્રદઃ ॥ ૫૦॥

બાણાસુરેન્દ્રપૂજ્યાઙ્ઘ્રિર્બાણલિઙ્ગો બહુપ્રદઃ ।
બન્દીકૃતાગમો બાલપાલકો બહુશોભિતઃ ॥ ૫૧॥

ભવાદિર્ભવહા ભવ્યો ભવો ભાવપરાયણઃ ।
ભવહૃદ્ભવદો ભૂતો ભણ્ડાસુરવરપ્રદઃ ॥ ૫૨॥

ભગાક્ષિમથનો ભર્ગો ભવાનીશો ભયઙ્કરઃ ।
ભઙ્ગકારો ભાવુકદો ભસ્માભ્યક્તતનુર્ભટઃ ॥ ૫૩॥

મયસ્કરો મહાદેવો માયાવી માનસાન્તરઃ ।
માયાતીતો મન્મથારિર્મધુપોઽથ મનોન્મનઃ ॥ ૫૪॥

મધ્યસ્થો મધુમાંસાત્મા મનોવાચામગોચરઃ ।
મણ્ડિતો મણ્ડનાકારો મતિદો માનપાલકઃ ॥ ૫૫॥

મનસ્વી મનુરૂપશ્ચ મન્ત્રમૂર્તિર્મહાહનુઃ ।
યશસ્કરો યન્ત્રરૂપો યમિમાનસપાવનઃ ॥ ૫૬॥

યમાન્તકરણો યામી યજમાનો યદુર્યમી ।
રમાનાથાર્ચિતપદો રમ્યો રતિવિશારદઃ ॥ ૫૭॥

રમ્ભાપ્રીતો રસો રાત્રિચરો રાવણપૂજિતઃ ।
રઙ્ગપાદો રન્તિદેવો રવિમણ્ડલમધ્યગઃ ॥ ૫૮॥

રથન્તરસ્તુતો રક્તપાનો રથપતી રજઃ ।
રથાત્મકો લમ્બતનુર્લાઙ્ગલી લોલગણ્ડકઃ ॥ ૫૯॥

લલામસોમલૂતાદિર્લલિતાપૂજિતો લવઃ ।
વામનો વાયુરૂપશ્ચ વરાહમથનો વટુઃ ॥ ૬૦॥

વાક્યજાતો વરો વાર્યો વરુણેડ્યો વરાશ્રયઃ ।
વપુર્ધરો વર્ષવરો વરીયાન્વરદો વરઃ ॥ ૬૧॥

વસુપ્રદો વસુપતિર્વન્દારુજનપાલકઃ ।
શાન્તઃ શમપરઃ શાસ્તા શમનાન્તકરઃ શઠઃ ॥ ૬૨॥

શઙ્ખહસ્તઃ શત્રુહન્તા શમિતાખિલદુષ્કૃતઃ ।
શરહસ્તઃ શતાવર્તઃ શતક્રતુવરપ્રદઃ ॥ ૬૩॥

શમ્ભુઃ શમ્યાકપુષ્પાર્ચ્યઃ શઙ્કરઃ શતરુદ્રગઃ ।
શમ્યાકરઃ શાન્તમનાઃ શાન્તઃ શશિકલાધરઃ ॥ ૬૪॥

ષડાનનગુરુઃ ષણ્ડઃ ષટ્કર્મનિરતઃ ષગુઃ ।
ષડ્જાદિરસિકઃ ષષ્ઠઃ ષષ્ઠીપ્રીતઃ ષડઙ્ગવાન્ ॥ ૬૫॥

ષડૂર્મિરહિતઃ શષ્પ્યઃ ષિદ્ગઃ ષાડ્ગુણ્યદાયકઃ । (ષિડ્ભ્યઃ)
સત્યપ્રિયઃ સત્યધામા સંસારરહિતઃ સમઃ ॥ ૬૬॥

સખા સન્ધાનકુશલઃ સર્વસમ્પત્પ્રદાયકઃ ।
સગરઃ સાગરાન્તાસ્થઃ સત્રાશઃ સરણઃ સહઃ ॥ ૬૭॥

સામ્બઃ સનાતનઃ સાધુઃ સારાસારવિશારદઃ ।
સામગાનપ્રિયઃ સારઃ સરસ્વત્યા સુપૂજિતઃ ॥ ૬૮॥

હતારાતિર્હંસગતિર્હાહાહૂહૂસ્તુતિપ્રિયઃ ।
હરિકેશો હરિદ્રાઙ્ગો હરિન્મણિસરોહઠઃ ॥ ૬૯॥

હરિપૂજ્યો હરો હાર્યો હરિણાઙ્કશિખણ્ડકઃ ।
હાહાકારાદિરહિતો હનુનાસો હહુઙ્કૃતઃ ॥ ૭૦॥

લાલાનનો લતાસોમો લક્ષ્મીકાન્તવરપ્રદઃ ।
લમ્બોદરગુરુર્લભ્યો લવલીશો લુલાયગઃ ॥ ૭૧॥

ક્ષયદ્વીરઃ ક્ષમાયુક્તઃ ક્ષયાદિરહિતઃ ક્ષમી ।
ક્ષત્રિયાન્તકરઃ ક્ષાન્તઃ ક્ષાત્રધર્મપ્રવર્તકઃ ॥ ૭૨॥

ક્ષયિષ્ણુવર્ધનઃ ક્ષાન્તઃ ક્ષપાનાથકલાધરઃ ।
ક્ષપાદિપૂજનપ્રીતઃ ક્ષપણાન્તઃ ક્ષરાક્ષરઃ ॥ ૭૩॥

રુદ્રો મન્યુઃ સુધન્વા ચ બાહુમાન્પરમેશ્વરઃ ।
સ્વિષુઃ સ્વિષ્ટકૃદીશાનઃ શરવ્યાધારકો યુવા ॥ ૭૪॥

અઘોરસ્તનુમાન્દેવો ગિરીશઃ પાકશાસનઃ ।
ગિરિત્રઃ પુરુષઃ પ્રાણઃ પઞ્ચપ્રાણપ્રવર્તકઃ ॥ ૭૫॥

અધ્યવોચો મહાદેવ અધિવક્તા મહેશ્વરઃ ।
ઈશાનઃ પ્રથમો દેવો ભિષજામ્પતિરીશ્વરઃ ॥ ૭૬॥

તામ્રોઽરુણો વિશ્વનાથો બભ્રુશ્ચૈવ સુમઙ્ગલઃ ।
નીલગ્રીવઃ શિવો હૃષ્ટો દેવદેવો વિલોહિતઃ ॥ ૭૭॥

ગોપવશ્યો વિશ્વકર્તા ઉદહાર્યજનેક્ષિતઃ ।
વિશ્વદૃષ્ટઃ સહસ્રાક્ષો મીઢુષ્ટો ભગવાન્હરઃ ॥ ૭૮॥

શતેષુધિઃ કપર્દી ચ સોમો મીઢુષ્ટમો ભવઃ ।
અનાતતશ્ચાતિધૃષ્ણુઃ સત્વાનાં રક્ષકઃ પ્રભુઃ ॥ ૭૯॥

વિશ્વેશ્વરો મહાદેવસ્ત્ર્યમ્બકસ્ત્રિપુરાન્તકઃ ।
ત્રિકાગ્નિકાલઃ કાલાગ્નિરુદ્રો નીલોઽધિપોઽનિલઃ ॥ ૮૦॥

સર્વેશ્વરઃ સદા શમ્ભુઃ શ્રીમાન્મૃત્યુઞ્જયઃ શિવઃ ।
સ્વર્ણબાહુઃ સૈન્યપાલો દિશાધીશો વનસ્પતિઃ ॥ ૮૧॥ (સ્વર્ણપાલઃ)

હરિકેશઃ પશુપતિરુગ્રઃ સસ્પિઞ્જરોઽન્તકઃ ।
ત્વિષીમાન્માર્ગપો બભ્રુર્વિવ્યાધી ચાન્નપાલકઃ ॥ ૮૨॥

પુષ્ટો ભવાધિપો લોકનાથો રુદ્રાતતાયિકઃ ।
ક્ષેત્રેશઃ સૂતપોઽહન્ત્યો વનપો રોહિતઃ સ્થપઃ ॥ ૮૩॥

વૃક્ષેશો મન્ત્રજો વાણ્યો ભુવન્ત્યો વારિવસ્કૃતઃ ।
ઓષધીશો મહાઘોષઃ ક્રન્દનઃ પત્તિનાયકઃ ॥ ૮૪॥

કૃત્સ્નવીતી ધાવમાનઃ સત્વનામ્પતિરવ્યયઃ ।
સહમાનોઽથ નિર્વ્યાધિરવ્યાધિઃ કકુભો નટઃ ॥ ૮૫॥

નિષઙ્ગી સ્તેનપઃ કક્ષ્યો નિચેરુઃ પરિચારકઃ ।
આરણ્યપઃ સૃકાવી ચ જિઘાંસુર્મુષ્ણપોઽસિમાન્ ॥ ૮૬॥

નક્તઞ્ચરઃ પ્રકૃન્તશ્ચ ઉષ્ણીષી ગિરિસઞ્ચરઃ ।

કુલુઞ્ચ ઇષુમાન્ધન્વી આતન્વાન્પ્રતિધાનવાન્ ॥ ૮૭॥

આયચ્છો વિસૃજોઽપ્યાત્મા વેધનો(?)આસનઃ પરઃ ।
શયાનઃ સ્વાપકૃત્જાગ્રત્સ્થિતો ધાવનકારકઃ ॥ ૮૮॥

સભાપતિસ્તુરઙ્ગેશ ઉગણસ્તૃંહતિર્ગુરુઃ ।
વિશ્વો વ્રાતો ગણો વિશ્વરૂપો વૈરૂપ્યકારકઃ ॥ ૮૯॥

મહાનણીયાન્રથપઃ સેનાનીઃ ક્ષત્રસઙ્ગ્રહઃ ।
તક્ષા ચ રથકારશ્ચ કુલાલઃ કર્મકારકઃ ॥ ૯૦॥

પુઞ્જિષ્ઠશ્ચ નિષાદશ્ચ ઇષુકૃદ્ધન્વકારકઃ ।
મૃગયુઃ શ્વાનપો(?)દેવો ભવો રુદ્રોઽથ શર્વકઃ ॥ ૯૧॥

પશુપો નીલકણ્ઠશ્ચ શિતિકણ્ઠઃ કપર્દભૃત્ ।
વ્યુત્પકેશઃ સહસ્રાક્ષઃ શતધન્વા ગિરીશ્વરઃ ॥ ૯૨॥

શિપિવિષ્ટોઽથ મીઢુષ્ટ ઇષુમાન્હ્રસ્વવામનઃ ।
બહુવર્ષવયા વૃદ્ધઃ સંવૃદ્ધ્વા પ્રથમોઽગ્રિયઃ ॥ ૯૩॥

આશુશ્ચૈવાજિરઃ શીઘ્યઃ શીભ્ય ઊર્મ્યોઽથ વસ્વનઃ ।
સ્રોતો દ્વીપ્યસ્તથા જ્યેષ્ઠઃ કનિષ્ઠઃ પૂર્વજોઽપરઃ ॥ ૯૪॥

મધ્યશ્ચાથાપગલ્ભશ્ચ ........ ।
આશુષેણશ્ચાશુરથઃ શૂરો વૈ ભિન્દિવર્મધૃક્ ॥ ૯૫॥

વરૂથી બિલ્મી કવચી શ્રુતસેનોઽથ દુન્દુભિઃ ।
ધૃષ્ણુશ્ચ પ્રહિતો દૂતો નિષઙ્ગી તીક્ષ્ણસાયકઃ ॥ ૯૬॥

આયુધી સ્વાયુધી દેવ ઉપવીતી સુધન્વધૃક્ ।
સ્રુત્યઃ પથ્યસ્તથા કાટ્યો નીપ્યઃ સૂદ્યઃ સરોદ્ભવઃ ॥ ૯૭॥

નાદ્યવૈશન્તકૂપ્યાશ્ચાવટ્યો વર્ષ્યો મેઘ્યોઽત્ય વૈદ્યુતઃ ।
ઈધ્ર્ય આતપ્ય વાતોત્થો રશ્મિજો વાસ્તવોઽસ્તુપઃ ॥ ૯૮॥

સોમો રુદ્રસ્તથા તામ્ર અરુણઃ શઙ્ગ ઈશ્વરઃ ।
ઉગ્રો ભીમસ્તથૈવાગ્રેવધો દૂરેવધસ્તથા ॥ ૯૯॥

હન્તા હનીયાન્વૃક્ષશ્ચ હરિકેશઃ પ્રતર્દનઃ ।
તારઃ શમ્ભુર્મયોભૂશ્ચ શઙ્કરશ્ચ મયસ્કરઃ ॥ ૧૦૦॥

શિવઃ શિવતરસ્તીર્થ્યઃ કૂલ્યઃ પાર્યો વાર્યઃ પ્રતારણઃ ।
ઉત્તારણસ્તથાલાદ્ય આતાર્યઃ શષ્પ્યફેનજઃ ॥ ૧૦૧॥

સિકત્યશ્ચ પ્રવાહ્યશ્ચ ઇરિણ્યઃ પ્રમથઃ કિંશિલઃ ।
ક્ષયણઃ કૂલગો ગોષ્ઠ્યઃ પુલસ્ત્યો ગૃહ્ય એવ ચ ॥ ૧૦૨॥

તલ્પ્યો ગેહ્યસ્તથા કાટ્યો ગહ્વરેષ્ઠો હૃદોદ્ભવઃ ।
નિવેષ્ટ્યઃ પાસુમધ્યસ્થો રજસ્યો હરિતસ્થિતઃ ॥ ૧૦૩॥

શુષ્કયો લોપ્યસ્તથોલપ્ય ઊર્મ્યઃ સૂર્મ્યશ્ચ પર્ણજઃ ।
પર્ણશદ્યોઽપગુરકઃ અભિઘ્નોત્ખિદ્યકોવિદઃ ॥ ૧૦૪॥

અવઃ (?) કિરિક ઈશાનો દેવાદિહૃદયાન્તરઃ ।
વિક્ષીણકો વિચિન્વત્ક્યઃ આનિર્હ આમિવત્કકઃ ॥ ૧૦૫॥

દ્રાપિરન્ધસ્પતિર્દાતા દરિદ્રન્નીલલોહિતઃ ।
તવસ્વાંશ્ચ કપર્દીશઃ ક્ષયદ્વીરોઽથ ગોહનઃ ॥ ૧૦૬॥

પુરુષન્તો ગર્તગતો યુવા મૃગવરોગ્રકઃ ।
મૃડશ્ચ જરિતા રુદ્રો મીઢ્યો દેવપતિર્હરિઃ ॥ ૧૦૭॥

મીઢુષ્ટમઃ શિવતમો ભગવાનર્ણવાન્તરઃ ।
શિખી ચ કૃત્તિવાસાશ્ચ પિનાકી વૃષભસ્થિતઃ ॥ ૧૦૮॥

અગ્નીષુશ્ચ વર્ષેષુર્વાતેષુશ્ચ ........ ।
પૃથિવીસ્થો દિવિષ્ઠશ્ચ અન્તરિક્ષસ્થિતો હરઃ ॥ ૧૦૯॥

અપ્સુસ્થિતો વિશ્વનેતા પથિસ્થો વૃક્ષમૂલગઃ ।
ભૂતાધિપઃ પ્રમથપ ........ ॥ ૧૧૦॥

અવપલઃ સહસ્રાસ્યઃ સહસ્રનયનશ્રવાઃ ।
ઋગ્ગણાત્મા યજુર્મધ્યઃ સામમધ્યો ગણાધિપઃ ॥ ૧૧૧॥

ઉર્મ્યર્વશીર્ષપરમઃ શિખાસ્તુત્યોઽપસૂયકઃ ।
મૈત્રાયણો મિત્રગતિસ્તણ્ડુપ્રીતો રિટિપ્રિયઃ ॥ ૧૧૨॥

ઉમાધવો વિશ્વભર્તા વિશ્વહર્તા સનાતનઃ ।
સોમો રુદ્રો મેધપતિવડ્ડુર્વૈ મરુતામ્પિતા ॥ ૧૧૩॥

........ અરુષો અધ્વરેશ્વરઃ ।
જલાષભેષજો ભૂરિદાતા સુજનિમા સુરઃ ॥ ૧૧૪॥

સંરાટ્પુરામ્ભિદ્દુઃખસ્થઃ સત્પતિઃ પાવનઃ ક્રતુઃ ।
હિરણ્યરેતા દુર્ધર્ષો વિશ્વાધિક ઉરુક્રમઃ ॥ ૧૧૫॥

ગુરુગાયોઽમિતગુણો મહાભૂતસ્ત્રિવિક્રમઃ ।
અમૃતો અજરોઽજય્યો રુદ્રોઽગ્નિઃ પુરુષો વિરાટ્ ॥ ૧૧૬॥

તુષારાટ્પૂજિતપદો મહાહર્ષો રસાત્મકઃ ।
મહર્ષિબુદ્ધિદો ગોપ્તા ગુપ્તમન્ત્રો ગતિપ્રદઃ ॥ ૧૧૭॥

ગન્ધર્વગાનપ્રીતાત્મા ગીતપ્રીતોરુશાસનઃ ।
વિદ્વેષણહરો હાર્યો હર્ષક્રોધવિવર્જિતઃ ॥ ૧૧૮॥

ભક્તપ્રિયો ભક્તિવશ્યો ભયહૃદ્ભૂતસઙ્ઘભિત્ ।
ભુવનેશો ભૂધરાત્મા વિશ્વવન્દ્યો વિશોષકઃ ॥ ૧૧૯॥

જ્વરનાશો રોગનાશો મુઞ્જિકેશો વરપ્રદઃ ।
પુણ્ડરીકમહાહારઃ પુણ્ડરીકત્વગમ્બરઃ ॥ ૧૨૦॥

આખણ્ડલમુખસ્તુત્યઃ કુણ્ડલી કુણ્ડલપ્રિયઃ ।
ચણ્ડાંશુમણ્ડલાન્તસ્થઃ શશિખણ્ડશિખણ્ડકઃ ॥ ૧૨૧॥

ચણ્ડતાણ્ડવસન્નાહશ્ચણ્ડકોપોઽખિલાણ્ડગઃ ।
ચણ્ડિકાપૂજિતપદો મણ્ડનાકલ્પકાણ્ડજઃ ॥ ૧૨૨॥

રણશૌણ્ડો મહાદણ્ડસ્તુહુણ્ડવરદાયકઃ ।
કપાલમાલાભરણસ્તારણઃ શોકહારણઃ ॥ ૧૨૩॥

વિધારણઃ શૂલકરો ધર્ષણઃ શત્રુમારણઃ ।
ગઙ્ગાધરો ગરધરસ્ત્રિપુણ્ડ્રાવલિભાસુરઃ ॥ ૧૨૪॥

શમ્બરારિહરો દક્ષહરોઽન્ધકહરો હરઃ ।
વિશ્વજિદ્ગોજિદીશાનો અશ્વજિદ્ધનજિત્તથા ॥ ૧૨૫॥

ઉર્વરાજિદુદ્ભજિચ્ચ સર્વજિત્સર્વહારકઃ ।
મન્દારનિલયો નન્દઃ કુન્દમાલાધરોઽમ્બુદઃ ॥ ૧૨૬॥

નન્દિપ્રીતો મન્દહાસઃ સુરવૃન્દનિષેવિતઃ ।
મુચુકુન્દાર્ચિતપદો દ્વન્દ્વહીનેન્દિરાર્ચિતઃ ॥ ૧૨૭॥

વિશ્વાધારો વિશ્વનેતા વીતિહોત્રો વિનીતકઃ ।

શઙ્કરઃ શાશ્વતઃ શાસ્તા સહમાનઃ સહસ્રદઃ ॥ ૧૨૮॥

ભીમો મહેશ્વરો નિત્ય અમ્બરાન્તરનર્તનઃ ।
ઉગ્રો ભવહરો ધૌમ્યો ધીરોદાત્તો વિરાજિતઃ ॥ ૧૨૯॥

વઞ્ચકો નિયતો વિષ્ણુઃ પરિવઞ્ચક ઈશ્વરઃ ।
ઉમાવરપ્રદો મુણ્ડી જટિલઃ શુચિલક્ષણઃ ॥ ૧૩૦॥

ચર્મામ્બરઃ કાન્તિકરઃ કઙ્કાલવરવેષધૃક્ ।
મેખલી અજિની દણ્ડી કપાલી મેખલાધરઃ ॥ ૧૩૧॥

સદ્યોજાતઃ કાલિપતિર્વરેણ્યો વરદો મુનિઃ ।
વસાપ્રિયો વામદેવસ્તત્પૂર્વો વટમૂલગઃ ॥ ૧૩૨॥

ઉલૂકરોમા ઘોરાત્મા લાસ્યપ્રીતો લઘુઃ સ્થિરઃ ।
અણોરણીયાનીશાનઃ સુન્દરભ્રૂઃ સુતાણ્ડવઃ ॥ ૧૩૩॥

કિરીટમાલાભરણો રાજરાજલસદ્ગતિઃ ।
હરિકેશો મુઞ્જિકેશો વ્યોમકેશો યશોધરઃ ॥ ૧૩૪॥

પાતાલવસનો ભર્તા શિપિવિષ્ટઃ કૃપાકરઃ ।
હિરણ્યવર્ણો દિવ્યાત્મા વૃષધર્મા વિરોચનઃ ॥ ૧૩૫॥

દૈત્યેન્દ્રવરદો વૈદ્યઃ સુરવન્દ્યોઽઘનાશકઃ ।
આનન્દેશઃ કુશાવર્તો નન્દ્યાવર્તો મધુપ્રિયઃ ॥ ૧૩૬॥

પ્રસન્નાત્મા વિરૂપાક્ષો વનાનાં પતિરવ્યયઃ ।
મસ્તકાદો વેદવેદ્યઃ સર્વો બ્રહ્મૌદનપ્રિયઃ ॥ ૧૩૭॥

પિશઙ્ગિતજટાજૂટસ્તડિલ્લોકવિલોચનઃ ।
ગૃહાધારો ગ્રામપાલો નરસિંહવિનાશકઃ ॥ ૧૩૮॥

મત્સ્યહા કૂર્મપૃષ્ઠાસ્થિધરો ભૂદારદારકઃ ।
વિધીન્દ્રપૂજિતપદઃ પારદો વારિધિસ્થિતઃ ॥ ૧૩૯॥

મહોદયો મહાદેવો મહાબીજો મહાઙ્ગધૃક્ ।
ઉલૂકનાગાભરણો વિધિકન્ધરપાતનઃ ॥ ૧૪૦॥

આકાશકોશો હાર્દાત્મા માયાવી પ્રકૃતેઃ પરઃ ।
શુક્લસ્ત્રિશુક્લસ્ત્રિમધુસ્ત્રિસુપર્ણઃ ષડઙ્ગવિત્ ॥ ૧૪૧॥

લલનાજનપૂજ્યાઙ્ઘ્રિર્લઙ્કાવાસોઽનિલાશનઃ ।
વિશ્વતશ્ચક્ષુરીશાનો વિશ્વતોબાહુરીશ્વરઃ ॥ ૧૪૨॥

સર્વાત્મા ભાવનાગમ્યઃ સ્વતન્ત્રઃ પરમેશ્વરઃ ।
વિશ્વભક્ષો વિદુમાક્ષઃ સર્વદેવશિરોમણિ ॥ ૧૪૩॥

બ્રહ્મ સત્યં તથાનન્દો જ્ઞાનાનન્દમહાફલઃ ।
ઈશ્વરઃ -
અષ્ટોત્તરં મહાદેવિ શેષાશેષમુખોદ્ગતમ્ ।
ઇત્યેતન્નામસાહસ્રં રહસ્યં કથિતં મયા ॥ ૧૪૪॥

પવિત્રમિદમાયુષ્યં પઠતાં શ◌ૃણ્વતાં સદા ।
યસ્ત્વેતન્નામસાહસ્રૈઃ બિલ્વૈઃ પઙ્કજકુડ્મલૈઃ ॥ ૧૪૫॥

પૂજયેત્સર્વકાલેષુ શિવરાત્રૌ મહેશ્વરિ ।
તસ્ય મુક્તિં દદામીશે સત્યં સત્યં ન સંશયઃ ॥ ૧૪૬॥

મમ પ્રિયકરં હ્યેતત્ફણિના ફણિતં શુભમ્ ।
પઠેત્સર્વાલ્◌ઁલભેતૈવ કામાનાયુડયમેવ ચ ॥ ૧૪૭॥

નામસાહસ્રપાઠી સ યમલોકં ન પશ્યતિ ।
કલ્યાણીં ચ લભેદ્ગૌરિ ગતિં નામ્નાં ચ વૈભવાત્ ॥ ૧૪૮॥

નાખ્યેયં ગોપ્યમેતદ્ધિ નાભક્તાય કદાચન ।
ન પ્રકાશ્યમિદં દેવિ માતૃકારુદ્રસંહિતમ્ ॥ ૧૪૯॥

ભક્તેષુ લભતે નિત્યં ભક્તિં મત્પાદયોર્દૃઢામ્ ।
દત્વાઽભક્તેષુ પાપાત્મા રૌરવં નરકં વ્રજેત્ ॥ ૧૫૦॥

- -

સૂતઃ -
ઇતિ શિવવચનં નિશમ્ય ગૌરી પ્રણયાચ્ચ પ્રણતા શિવાઙ્ઘ્રિપદ્મે ।
સુરવરતરુસુન્દરોરુપુષ્પૈરભિપૂજ્ય પ્રમથાધિપં તુતોષ ॥ ૧૫૧॥

તુષ્ટાવ કષ્ટહરમિષ્ટદમષ્ટદેહં નષ્ટાઘસઙ્ઘદુરદૃષ્ટહરં પ્રકૃષ્ટમ્ ।
ઉત્કૃષ્ટવાક્યસુરવૃન્દગણેષ્ટદાનલોલં વિનષ્ટતમસં શિપિવિષ્ટમીશમ્ ॥ ૧૫૨॥

- -

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભર્ગાખ્યે પઞ્ચમાંશે શિવગૌરીસંવાદે

શિવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૪૦। ૧-૧૫૨॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 40. 1-152..

Notes:
Shiva narrates to Devi, the 1008 names
recited by Adishesha eulogizing Him
(Shiva). The composition includes
several names that are part of Sri Rudram.
The sahasranAmastotram starts from
verse 14 ending at 144.1.

The source text has missing names at some places.

Encoded by DPD
Proofread by DPD, Ruma Dewan

---

*Shiva Sahasranama Stotram from Shivarahasya*
pdf was typeset on July 1, 2023

Please send corrections to *sanskrit@cheerful.com*